**पत्रवेष्ट** पु० पत्रमिव वेष्ट्यते वेष्ट–कर्मणि घञ् । ताडङ्के रघुः १६।१७श्लो० ।

**पत्रशाक** पत्रात्मकं शाकम् । "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा । शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्"भावप्र०उक्ते शाकवर्गमध्ये पत्रात्मकशाके । पत्रशाकानि च वास्तूकादीनि शर्षपान्तानि, पुष्पशाके कदलीपुष्पशाल्मलीपुष्पे, फलशाकानि कुष्माण्डादिकण्टकारीफलान्तानि, नालशाकं सर्षपनालम् । कन्दशाकानि सूरणादिशालूकान्तानि, संस्वेदजशाकं शिलीन्ध्रादि" तत्र दृश्यम् ।

**पत्र(शि)सिरा** स्त्री ६त० । १पत्रनाड्यां २पत्रभङ्गे हारा०

**पत्रशृङ्गी** स्त्री पत्रं शृङ्गमिवास्याः ङीष् । द्रवन्तीलतायाम् राजनि० । [६त० । २पत्राणां पङ्क्तौ च ।

**पत्रश्रेणी** स्त्री पत्राणां श्रेणीव । १द्रवन्तीलतायां राजनि०

**पत्रश्रेष्ठ** पु० पत्रं श्रेष्ठं यस्य । विल्ववृक्षे राजनि० ।

**पत्रसुन्दर** पु० पत्रं सुन्दरमस्य । स्वनामख्याते वृक्षभेदे मेदि० । [ङीप् ।

**पत्रसूचि** स्त्री न० पत्राणां सूचिरिव । कण्टके त्रिका० वा

**पत्रहिम** न० पत्रेषु हिमं यतः । हिमदुर्द्दिने त्रिका०

**पत्राख्य** न० पत्रेति आख्या यत्र । १तेजपत्रे शब्दच० २तालीशपत्रे राजनि० ।

**पत्राङ्ग** न० पत्रमिवाङ्गमस्य । १रक्तचन्दनाकारे काष्ठभेदे (वकम) अमरः । २भूर्जपत्रवृक्षे ३पद्मके च मेदि० ।

**पत्राङ्गुलि** स्त्री पत्रमिवाङ्गुलयो यत्र । पत्रभङ्गे तिलकभेदे अमरः । [शब्दर०।

**पत्राञ्जन** न०पत्रमज्यतेऽनेन अन्ज–करणे ल्युट् । मस्याम् ।

**पत्राढ्य** त्रि० पत्रैराढ्यम् । १बहुपत्रयुक्ते २पिप्पलीमूले ३पर्वततृणे च न० राजनि० ।

**पत्रान्य** न० पत्राङ्ग+पृषो० । (वकम) काष्ठभेदे राजनि०।

**पत्राम्ला** स्त्री पत्रेणाम्ला । (चुकोपालङ्ग)शाकभेदे वैद्यक०

**पत्रालु** पु० पत्र+अस्त्यर्थे आलु । १कासालौ २इक्षुदर्भे च राजनि० । [६त० । २पत्रपङ्क्तौ च ।

**पत्रावलि** न०पत्राणामावलयो यस्मात् । १गैरिके शब्दाच०

**पत्रावली** स्त्री पत्राणामावलीव । १पत्रभङ्गे तिलकभेदे शब्दच० ६त० । २पत्रश्रेणौ च

**पत्रिका** स्त्री पत्री+स्वार्थे क कापि ह्रस्वः । १लिप्याम् । पत्रं विद्यतेऽस्याः ठन् । २प्रशस्तपत्रयुक्तासु नवसु कदल्यादिषु नवपत्रिकाशब्दे २९६०पृ० उदा० दृश्यम् । ३पत्रिकाख्ये कर्पूरभेदे (पातकपुर) त्रिकाण्डशेषः ।

**पत्त्रिकाख्य** पत्त्रिका आख्या यस्य । कर्पूरभेदे राजनि० ।

**पत्त्रिन्** त्रि० पत्त्र+अस्त्यर्थे इनि । १पर्णयुक्ते २शरे पु० ३खगे अमरः ४श्येनखगे ५वृक्षे च पु० राजनि० ५पर्वते पु० मेदि० ६ताले ७श्वेतकिणिहीवृक्षे ८गङ्गापत्र्यां ९पाठायाञ्च राजनि० १०पत्रवे स्त्री शब्दच० ङीप् ।

**पत्त्री** स्त्री पत–ष्ट्रन् ङीप् । लिपौ

**पत्त्रोपस्कर** पु० पत्त्रेणोपस्करोऽस्य । कासमर्दे हारा०

**पत्त्रोर्ण** न० पत्त्रजाता ऊर्णा साधनत्वेनास्त्यस्य अच् । धौतकौषेये पट्टसूत्रमयवस्त्रे अमरः वदरादिपर्णजातकृमिजातोर्णाजातत्वात्तस्य तथात्वम् ।

**पत्त्र्य** त्रि० पत्त्रस्य हितं यत् । श्योनाके वृक्षे पु० अमरः

**पत्नी** स्त्री पति+"पत्युर्नो यज्ञसम्बन्धे" पा० नः, ङीप् च । १पतिकृतयज्ञफलभोक्त्र्यां विवाहितायां स्त्रियाम् अमरः "पत्नीमूलं गृहं पुंसां यदि छन्दोऽनुवर्त्तिनी । गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा । तया धर्मार्थकामानां त्रिवर्गफलमश्नुते । प्राकाम्ये वर्त्तमाना तु स्नेहान्न तु निवारिता । अवश्या सा भवेत् पश्चाद् यथा व्याधिरुपेक्षितः । अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा । आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी । अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि । प्रतिकूलकलत्रस्य नरको नात्र संशयः । स्वर्गोऽपि दुर्लभं ह्येतदनुरागः परस्परम् । रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम् ? । गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम् । सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी । दुःखदाऽन्या सदा खिन्ना चित्तभेदात् परस्परम् । प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः । योषित् सर्वा जलौकेव भूषणाच्छादनाशनैः । सुभृत्यापि कृता नित्यं पुरुषं ह्यपकर्षति । जलौका रक्तमादत्ते केवलं सा तपस्विनी । इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम् । सशङ्का बालभावे तु यौवने विमुखी भवेत् । तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम् । अनुकूला न वाग्दुष्टा दक्षा साध्वी पतिव्रता । एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः । या हृष्टमनसा नित्यं स्थानमानविचक्षणा । भर्त्तुः प्रीतिकरी नित्यं सा भार्य्या ह्यीतरा ज्वरा" इत्युक्त० । [शालायाम् ।

**पत्नीशाला(ल)** न०स्त्री ६त० वा क्लीवत्वम् । पत्न्यधिष्ठित-

**पत्नीसंनहन** न०६त०। मेखलया योक्त्रेण वा प्रतिप्रस्थात्र-